ISSN- ०९७६-८०१७ & UGC Care listed

# गुरुकुल-पत्रिका

## (प्राच्यविद्याओं की त्रैमासिकी मूल्याङ्कित शोध-पत्रिका)

(A Quarterly Peer Reviewed Research Journal of Oriental Studies)

अङ्क ७५/३ जनवरी-मार्च २०२४

**सम्पादक**

प्रो० (डॉ०) ब्रह्मदेव विद्यालङ्कार
अध्यक्ष, संस्कृत विभाग
संकायाध्यक्ष, शिक्षा एवं प्रशिक्षण संकाय
दूरभाष - ६३९७६३४८६२, ९४१२३०७१२३
E-Mail : gurukulpatrika@gkv.ac.in

गुरुकुल काँगड़ी (समविश्वविद्यालय), हरिद्वार – २४९४०४

# अनुक्रमणिका

| | | | |
|---|---|---|---|
| १ | तैत्तिरीय उपनिषद् में शिक्षा और अध्यात्म का समन्वय | प्रो० ज्ञानप्रकाश शास्त्री | १ |
| २ | आचार्य हरिभद्रसूरि के योगविषयक ग्रन्थों के आलोक में योग का अधिकारी | प्रो० सुरेन्द्र कुमार, कुलदीप | १० |
| ३ | भाषावैज्ञानिक दृष्टिकोण से ऋग्वेद का महत्त्व | डॉ० सोमवीर सिंघल | १५ |
| ४ | द्यावापृथिवी का वैदिक स्वरूप | डॉ० विश्वेश 'वाग्मी' | २२ |
| ५ | व्याकरणस्य दार्शनिकता | डॉ० अर्चना कुमारी | २९ |
| ६ | वेदाङ्ग छन्द शास्त्र : स्वरूप एवं महत्त्व | डॉ० सन्त प्रकाश तिवारी | ३४ |
| ७ | लघुत्रयी में अम्लपित्त व्याधि (Accidity); निदान एवं उपचार | डॉ० सतीश कुमार | ३८ |
| ८ | पारम्परिक खेल और स्वास्थ्य | डॉ० अजय मलिक, डॉ० बिन्दु मलिक, दिवाकर | ४३ |
| ९ | वेदों में राष्ट्रिय चेतना | डॉ० देवराज | ४९ |
| १० | मौर्योत्तरयुगीन अभिलेखों में वैदिक संस्कृति के प्रभावों का ऐतिहासिक अनुशीलन | डॉ० सौरभ जी | ५६ |
| ११ | प्रत्ययपरिशीलनम् | डॉ० सोमदत्तः | ६२ |
| १२ | काश्मीर शैवदर्शन में प्रतिपादित चतुर्विध "वाक्" का विवेचन | डॉ० शिवानन्द बेहेरा | ६७ |
| १३ | मतुबर्थीय प्रकरण की इयत्ता और मतुबर्थक प्रत्ययों का प्रयोग | विष्णु देव तिवारी, प्रो० सत्यपाल सिंह | ७५ |
| १४ | आयुर्वेदीयदर्शनः मानव जीवन के समस्त शाश्वत सुख का मूल | डॉ० देव प्रकाश | ८४ |
| १५ | प्राणायाम का मन, मस्तिष्क एवं शरीर पर प्रभाव एक विवेचनात्मक अध्ययन | कविता खोलिया, डॉ० दीनदयाल | ९८ |
| १६ | वैदिक विज्ञान का स्वरूप – भौतिक एवं आध्यात्मिक | विकास , डॉ० बबलू वेदालङ्कार | १०३ |
| १७ | ऋग्वेदादिभाष्यभूमिका में प्रतिपादित वेदोक्त सामाजिक चिन्तन | सुमति | १०९ |
| १८ | उपनिषदीय आधार पर उत्तर भारत में तन्त्र-परम्परा के सन्दर्भ में षडंगयोग समीक्षा | सुशील कुमार, प्रो० सुरेन्द्र कुमार | ११६ |
| १९ | नीतिशास्त्रीयकरव्यवस्थाया: आधुनिकपरिप्रेक्ष्ये उपादेयता | प्रीतिः आर्या, प्रो० ब्रह्मदेवो विद्यालङ्कारः | १२२ |
| २० | वैदिकसंहितासु धर्मशास्त्रीयो विचार: | डॉ० ब्रह्मप्रकाश:, डॉ० कँवरसिंह: | १२८ |
| २१ | महाभारत में प्राणायाम का स्वरूप | सुमित सुहाग | १३४ |

गुरुकुल पत्रिका, अङ्क-७५.३, जनवरी-मार्च २०२४, ISSN ०९७६-८०१७ (UGC care listed), पृ० १२८-१३३

# वैदिकसंहितासु धर्मशास्त्रीयो विचारः


## डॉ० ब्रह्मप्रकाशः

सहायकाचार्यः, संस्कृतविभागः, हंसराजमहाविद्यालयः, दिल्लीविश्वविद्यालयः, दिल्ली

## डॉ० कँवरसिंहः

सह-आचार्यः, संस्कृतविभागः, श्रीवेंकटेश्वरमहाविद्यालयः, दिल्लीविश्वविद्यालयः, दिल्ली


यद्यपि धर्मशास्त्रीयाणां विषयाणां सम्यग् विवेचनं शास्त्ररूपेण धर्मसूत्रकालादेवोपलभ्यते। परन्तु तेषां सर्वेषां बीजं तु वैदिकसंहितास्वेवान्विष्यते। सर्वाणि धर्मशास्त्राणि धर्मस्य मूलं वेदमेव स्वीकुर्वन्ति। यथोक्तं बौधायनधर्मसूत्रे -'उपदिष्टो धर्मः प्रतिवेदम्'।[१] एवमेवापस्तम्बधर्मसूत्रे 'धर्मज्ञसमयः प्रमाणम्' ? 'वेदाश्च'।[२] वासिष्ठधर्मसूत्रेऽपि - 'श्रुतिस्मृतिविहितो धर्मः।[३] एवं प्रकाराण्येव वाक्यान्यन्येष्वपि धर्मसूत्रेषूपलभ्यन्ते। धर्मस्मृतिष्वपि वेद एव धर्माश्रयत्वेन गृह्यते। यथोक्तं मनुस्मृतौ -

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।**[४]

तत्रैवोक्तं यन्मनुना स्वीया धर्मव्यवस्था न प्रतिपादिता, अपितु तेन तु स एव धर्मः प्रोक्तः य खलु वेद अभिहितः-

**यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः। स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।**[५]

स्मृतीनामपि प्रामाण्यं श्रुतिमूलत्वादेव मन्यते। स्मृतीनां निर्माणं वेदवचनानां स्मरणादेव भवति। यथोक्तं भर्तृहरिणा –

**स्मृतयो बहुरूपाश्च दृष्टादृष्ट प्रयोजनाः। तमेवाश्रित्य लिम्यो वेदविद्भिः प्रकल्पिताः।।**[६]

अस्यायमर्थो यत् सर्वेषां स्मृतिप्रोक्तविषयाणां संकेताः वेदेष्वेव विद्यन्ते। कथनस्यास्य प्रमाणाय वैदिकसंहिताषु अष्वन्वेषणमावश्यकं विद्यते। परन्तु नेदं सुकरं कार्यं वेदानां नैकविषयत्वप्रतिपादनात्। वेदमन्त्राणामनेकविध-व्याख्यानत्वाच्च। परन्तु सूक्ष्मावलोकनेन धर्मशास्त्रीयतत्त्वानां संकेता यत्र -कुत्रचिदुपलभ्यन्ते।

ऋग्वेदे धर्मशब्दः प्रायः षष्टिस्थानेषूपलभ्यते। परन्तु धर्मशब्दस्य तत्र कोऽर्थ इति निश्चयेन वक्तुं न शक्यते। सायणाचार्येण विभिन्नेषु स्थलेषु विभिन्ना अर्था अक्रियन्त। अत्र कानिचिदुदाहरणानि द्रष्टव्यानि सन्ति -

**त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः।**

**अतो धर्माणि धारयन्।**[७]

अत्र सायणेन धर्माणि इत्यस्य पदस्य 'अग्निहोत्रादीनि' इत्यर्थः कृतः।

**त्वं तमिन्द्र पर्वतं न भोजसे महो नृम्णस्य धर्मणामिरज्यसि।**[८]

अत्र 'धर्मणाम्' इत्यस्य पदस्य सायणेन 'धारयितृणाम्' इत्यर्थः कृतः।

---

१ बौ.ध.सू. १.१.१.१

२ आ.ध.सू. १.१.१.२,३

३ वा.ध.सू. १.४

४ मनु. २.६

५ तत्रैव २.७

६ वाक्यपदीयम् १.७

७ ऋग्वेदः. १.२२.१८

८ ऋग्वेदः १.५५.३

**सुजन्मनी धिषणे अन्तरीयते देवो देवी धर्मणा सूर्यः शुचिः ।**[९]

अत्र 'धर्मणा' इत्यस्य पदस्य 'प्रकाशोदकदानादिधारणेन युक्तः सन्' इत्यर्थः कृतः ।

**स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथ: पदमद्वयाविनः ।**[१०]

अत्र 'धर्मणि धारणे रक्षणे निमित्तभूते सति इत्यर्थः कृतः ।

**उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ।**[११]

अत्र 'धर्माणि अनुष्ठानानि' इत्यर्थः कृतः ।

**यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।**[१२]

अत्र 'धर्माणि अग्निसाधनानि कर्माणि' इत्यर्थः कृतः ।

**पितुं तु स्तोषं महो धर्माणं तविषीम् ।**[१३]

अत्र 'धर्माणं सर्वस्य धारकं लोकस्य धारकं वा इत्यर्थः कृतः ।

**यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्यवनीरधारयः ।**[१४]

अत्र 'धर्मणा सकललक्षणेन कर्मणा' इत्यर्थः कृतः ।

**या इन्द्र प्रस्वस्त्वासा गर्भमचक्रिरन् । परि धर्मेव सूर्यम् ।**[१५]

अत्र 'परि धर्मेव सूर्यम्' इत्यस्यांशस्य 'सूर्यमण्डलस्योपरि धर्मेव धारकं पोषकमुदकं यथा रश्मयो गर्भरूपेण बिभ्रति तद्वत् । यद्वा । परि धर्मेव परितो धारयितारं सूर्यमिव' इति वैकल्पिको द्वावर्थौ कृतौ ।

**विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः ।**[१६]

अत्र 'धर्मणस्पतेः' इत्यस्य पदस्य 'धर्मणः कर्मणः पतेः पालकस्य' इत्यर्थ: कृत: ।

**पवमान धिया हितोऽभि योनिं कनिक्रदत् । धर्मणा वायुमा विश । ।**[१७]

अत्र 'धर्मणा वायुम् । वायुसंबन्धि पात्रम् ।' इत्यर्थः कृतः ।

**पवस्व देवायुषगिन्द्रं गच्छतु ते मदः । वायुमारोह धर्मणा ।**[१८]

अत्र 'धर्मणा धारकेण रसेन' इत्यर्थः कृतः ।

**अजीजनो अमृत मर्त्येष्वाँ ऋतस्य धर्मन्नमृतस्य चारुणः ।**[१९]

अत्र 'धर्मन् धारकेऽन्तरिक्षे' इत्यर्थः कृतः ।

---

९ ऋग्वेदः. १.१६०.१

१० ऋग्वेदः १.१५९.३

११ ऋग्वेदः १.१६४.४३

१२ ऋग्वेदः १.१६४.५०

१३ ऋग्वेदः १.१८७.१

१४ ऋग्वेदः २.१३.७

१५ ऋग्वेदः ८.६.२०

१६ ऋग्वेदः ९.३५.६

१७ ऋग्वेदः ९.२५.२

१८ ऋग्वेदः ९.६३.२२

१९ ऋग्वेदः ९.११०.४

एषूदाहरणेष्वेतदवलोक्यते यत् 'धर्मन्' इत्यस्य पदस्य सायणेन कुत्रचित् 'अनुष्ठानम्', कुत्रचित् 'अग्निहोत्रम्' कुत्रचित् 'उदकम्' कुत्रचिद् 'रसः' कुत्रचिद् 'अन्तरिक्षम्' कुत्रचिद् 'धारयिता' कुत्रचिच्च 'कर्म' इत्यादयोऽर्थाः कृताः। यद्यप्येतेष्वर्थेषु वैलक्षण्यं प्रतीयते परन्त्वेते सर्वेऽर्थाः **धृ धारणपोषणयोः** इत्यर्थमूलका एव सन्ति। यः कश्चिद् धारयति पोषयति वा स एव धर्मः। यद्वा आत्मनः धारणाय पोषणाय वा यो धार्यते स धर्मः। ऋग्वेदे सर्वत्र नकारान्तं 'धर्मन्' इति प्रातिपदिकं नपुंसकलिङ्गे प्रयुज्यते। यजुर्वेदादिसंहितासु 'धर्म' इत्यकारान्तं पुल्लिङ्गं प्रातिपदिकमपि प्रयुज्यते। अनेनानुमीयते यद् ऋग्वेदे 'धर्मन्' शब्दः धारणयोग्यशक्तिमतः कस्यापि द्रव्यस्यार्थे प्रयोक्तुं शक्यते स्म परन्तूत्तरकाले मनुष्यजीवनधारणयोग्ये व्यवहारार्थे एव 'धर्म' शब्दो रूढो बभूव। अद्यत्वे लोकहिताय आत्मनो हिताय वा धार्यमाणाचारव्यवस्था धर्मपदेनाभिधीयते।

भारतवर्षस्य जीवनपद्धत्यामाचारस्य महत्त्वं प्राचीनकालेऽत्यधिकमासीत्। वेदविदां शिष्टानामाचार एव परम्परितो धर्मनाम्ना प्रसिद्धिमागतः। स एव धर्मशास्त्रेषु संकलितः पृथक्शास्त्ररूपत्वं गृहीतवान्। अत एव वेदः धर्ममूलत्वेनाभिधीयते। यद्यपि काले-काले धर्मस्वरूपे परिवर्तनं जातं तथापि स एव आचारः स्वीकार्यः शिष्टसम्मतश्चासीद् यस्य वेदवचनैः सह विरोधो नासीत्। अत एवोक्तं मनुस्मृतौ–

**अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते। धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।।**[२०]

एवमेव कुल्लूकभट्टेन जाबालवचनान्युधृतानि- **श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी।**

**अविरोधे सदा कार्यं स्मार्तं वैदिकवत्सता।।**[२१]

भर्तृहरिणापि वाक्यपदीयस्य स्वोपज्ञवृत्तौ कथितम् -

**क्वचिच्च विषये लिंगानि दृष्टानि स्थालीपुलाकवत् श्रुत्यर्थाविरोधिन्याः स्मृतेः प्रामाण्यकल्पनयालम्।**[२२]

इदानीं धर्मशास्त्रस्य मूलबीजानि वैदिकसंहितास्वन्वेष्टुं प्रयतामहे।

(१) **तपश्चर्या** -धर्मस्यात्मा तपोऽस्ति। मनुना यो धृतिक्षमादिदशलक्षणात्मकः धर्म उदीरितः [२३] तस्य मूलभावना तप एवास्ति। तपसा विना धर्मं साधयितुं न शक्यते। संहितासु तपसो महत्त्वं पदे-पदे प्रशस्यते। ऋग्वेदे ऋतस्य सत्यस्य चोत्पत्तिः तपस एव प्रोक्ता –

**ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत।**[२४]

'ऋत' पदं सृष्टेर्मूले विद्यमानस्य शाश्वतनियमस्य वाचकः। सृष्टेः कारणमपि तप एवोक्तम्–

**तपसस्तन्महिना जायतैकम्** [२५]

देवानामपि तेजांसि तपोजन्यान्येव। अत एवोक्तमग्निविषये -

**तमजरेभिवृषभिस्तव स्वैस्तपा तविष्ठ तपसा तपस्वान्।**[२६]

(२) **पापदोषोन्मूलनम्** - धर्माचरणस्योद्देश्यं पापनिवारणमस्ति। पापमेव लोके दुःखकारणम्। ऋग्वेदे पापनिवारणाय अष्टर्चात्मके

सम्पूर्णसूक्तेऽग्निदेवः प्रार्थितः[२७] -

---

२० मनु. २.१३

२१ मनु. २.१३

२२ भर्तृहरिः, स्वोपज्ञवृत्तौ १.७

२३ मनु. ६.९२, घृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।

२४ ऋग्वेदः १०.१९०.१

२५ ऋग्वेदः १०.१२९.३

२६ ऋग्वेदः ६.५.४

**अप नः शोशुचदघमग्ने शुशुग्ध्या रयिम्। अप नः शोशुचदघम्।**

(३) **प्रायश्चित्तम्** - धर्माचरणे शैथिल्ये सति धर्मशास्त्रेषु प्रायश्चित्तस्य विधानं कृतम्। सैव प्रायश्चित्तभावना ऋग्वेदेऽभिलक्ष्यते। एतन्मन्यते स्म यद् धर्माचरणे शैथिल्ये कृते सति वरुणदेवता चुक्रोध। अतएव क्षमां प्रदातु वरुणदेवता भूयशः प्रार्थ्यते -

**यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्या३श्चरामसि। अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः।।**[२८]

एवमेवाथर्ववेदेऽग्नि देवता प्रार्थ्यते -

**यदस्मृति चकृम किंचिदग्न उपारिम चरणे जातवेदः। ततः पाहि त्वं नः प्रचेतः शुभे सखिभ्यो अमृतत्वमस्तु नः।**[२९]

(४) **पवित्रता** - धर्मशास्त्रेषु सर्वेष्वेव व्यवहारेषु पवित्रतायाः निर्देशः स्थाने - स्थाने कृतः। पवित्रव्यवहारेण विना धर्मनियमाः पालयितुं न शक्यन्ते।

संहितासु नैकेषु मन्त्रेषु देवेभ्यः पवित्रता प्रार्थ्यते –

**पुनन्तु मां देवजनाः पुनन्तु वसवो धिया। विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा।**[३०]

**अस्तेयम्** - धर्मशास्त्रेषु 'अस्तेयम्' धर्मलक्षणेष्वेकं लक्षणमस्ति। स्तेयस्य निन्दा वेदेष्वनेकशः क्रियते। यथा ऋग्वेदे -

**यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस्तनूनाम्।**

**रिपुः स्तेनः स्तेयकृद्दभ्रमेतु नि ष हीयतां तन्वा३तना च ॥**[३१]

**सत्यम्** – सत्यमपि धर्मलक्षणेष्वेकमुदीरितम्। ऋग्वेदेऽपि अनृतव्यवहारस्य निन्दा कृता –

**यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः। आप इव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता।।**[३२]

**धी:** - धर्मलक्षणेनाभिधीयमानां धियं प्राप्तुमथर्ववेदे प्रार्थ्यते-

**यां मेधामृभवो विदुर्यां मेधामसुरा विदुः। ऋषयो भद्रां मेधां यां विदुस्तां मय्यावेशयामसि ॥**[३३]

ऋग्वेदेऽपि गायत्री मन्त्रत्वेन प्राप्तख्यातौ मन्त्रे उत्तमाया धियः प्रेरणायै प्रार्थना विद्यत इति सर्वविदितमेव।

**विद्या**- एवमेव विद्यायाः प्रशंसायां वेदेषु बहवो मन्त्राः सन्ति। यद्यपि ऋग्वेदे विद्याशब्दस्य प्रयोगो न विद्यते परन्तु तस्मिन्नर्थे 'सरस्वती', वाक्, गो इत्यादयः शब्दा प्रयुज्यन्ते। सरस्वत्याः प्रशंसायां बहवो ऋचः सन्ति। तद्यथा-

**चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्। यज्ञं दधे सरस्वती।**

**महो अर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति।**[३४]

यजुर्वेदे विद्याशब्दो विद्यते। तत्रोक्तम्- **विद्ययामृतमश्नुते।**[३५]

---

२७ ऋग्वेदः १.९७.१-८

२८ ऋग्वेदः ७.८९.५

२९ अथर्ववेद ७.१०६.१

३० ऋग्वेदः ९.६७.२७

३१ ऋग्वेदः ७.१०४.१०

३२ ऋग्वेदः ७.१०४.८

३३ अथर्ववेद ६.१०८.३

३४ ऋग्वेदः १.३.११,१२

३५ यजु. ४०.१४

**वर्णधर्मः**- ऋग्वेदकालादेव वर्णधर्मः सम्यग्व्यवस्थितः प्रतीयते। पुरुषसूक्ते चतुर्वर्णानां नामानि तेनैव क्रमेण विद्यन्ते यथा धर्मशास्त्रेषु प्रोक्तानि -

**ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः। उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत।।**[३६]

अत्र तेषामुत्पत्तिस्थाननिर्देशेन तेषां कार्यविभाजनमपि गम्यते। यथा शरीरे मुखस्य स्थानं सर्वोपरि विद्यते, भाषणस्य च कार्यं मुखेनैव भवति तथैव मानवसमाजे ब्राह्मणस्य स्थानं सर्वोपरि विद्यते। मुखेनेव वक्तृरूपेण अर्थात् उपदेष्टारूपेण तस्य कार्यं विद्यते। प्राप्तविद्यो ब्रह्मवेत्ता विद्वान् 'ब्रह्मणः' इति प्रचक्ष्यते। बाहुभ्यां यथा कर्मद्वारा शत्रुनिर्युद्धद्वारा वा शरीरस्य रक्षा क्रियते तथैव क्षत्रियः समाजस्य राष्ट्रस्य वा रक्षाकार्यं सम्पाद्यते। यथोरू शरीरस्य मध्यभागः ऊर्ध्वनिम्नभागयोराधारभूतत्वात् पोषकः, तथैव कृषिवाणिज्यादिकर्मकुर्वाणो वैश्यः राष्ट्रस्य पोषको भवति। एवमेव यथा पादाभ्यामेव शरीरस्य गतिः सम्भवति तथैव राष्ट्रस्य गतिरन्यवर्णेष्वपि विद्यमानेषु शूद्रेण विना न सम्भवति। अत्र शूद्रशब्दो न हीनतायाः वाचकः। यथा शरीरे पादयोर्महत्त्वं मुखाद्यङ्गवत् विद्यते तथैव शूद्राणामपि महत्त्वं अन्यवर्णैः समानमेवास्ति। यद्यपि ऋग्वेदे ब्राह्मणादीनां कर्माणि पृथक्त्वेन नोक्तानि तथापि कार्यविभाजनस्य सूत्रं त्वस्मिन्नेव मन्त्र उपलभ्यते यमाश्रित्यैव सम्पूर्णा वर्णव्यवस्था प्रपञ्चिता।

**आश्रमधर्मः** - धर्मशास्त्रेषु मनुष्यस्य आयुः शतवर्षमितं मत्वा वयसश्च चत्वारो भागाः कृताः। प्रत्येकं भागमाश्रमं कल्पयित्वा च तेषां क्रमेण ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासा' इति नामानि दत्तानि। यद्यपि संहितासु 'गृहस्थवानप्रस्थसंन्यास' इति पारिभाषिकाः शब्दाः नोपलभ्यन्ते परन्तु तेषां कार्याणामुल्लेखः संहितासु यत्र - तत्रोपलभ्यते। यथाऽथर्ववेदे ब्रह्मचर्यविषये प्रोक्तम् -

**ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति। आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते।।**[३७]

तथैव-

**ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत। इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्वरा भरत्।।**[३८]

ऋग्वेदे मण्डूकसूक्तान्तर्गतानां मन्त्राणां व्याजेन ब्रह्मचर्यव्रतधारिणां ब्राह्मणानां विद्या- ग्रहणप्रणाल्युद्घाटिता। तत्र व्रतचारिणो ब्राह्मणा वर्षपर्यन्तं शयानैः मण्डूकैरूपमीयन्ते –

**संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः। वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः।।**[३९]

अन्योऽन्यमनुब्रुवाणाः मण्डूकाः गुरोर्वाचमनुकुर्वद्भिः शिष्यैरूपमीयन्ते -

**यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः।।**[४०]

गृहस्थाश्रमस्याधारो विवाहोऽस्ति। ऋग्वेदस्य एकं पूर्णं सूक्तं, [४१]विवाहमवलम्ब्यैव विद्यते। यजुर्वेदेऽथर्ववेदे च गृहस्थप्रवेशविषयका मन्त्राः उपलभ्यन्ते।[४२]

उत्तरौ द्वावश्रमौ निवृत्तिमूलकौ स्तः। यद्यपि संहितासु स्फुटतयैतयोरुल्लेखो नास्ति तथापि निवृत्तिमूलकाः अनेके मन्त्राः सन्ति। यथा ऋग्वेदे केवलमात्मनः शरीरपोषणायान्नं भक्षयतः निन्दा क्रियते -

**मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य।**

---

३६ ऋग्वेदः १०.९०.१२

३७ अथर्व. ११.५.१७

३८ अथर्व. ११.५.१९

३९ ऋग्वेदः ७.१०३.१

४० ऋग्वेदः ७.१०३.५

४१ ऋग्वेदः १०.८५

४२ यजु. ३.४१, अथर्व. ७.६०.१

**नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी।।**[४३]

**राजधर्मः** - संहितासु राजधर्मसम्बन्धिनो भूयान् विचारा उपलभ्यन्ते। ऋग्वेदे विस्तृतस्य स्वतन्त्रराज्यस्य च कामनाऽक्रियत। व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये। ऋग्वेदस्य द्वे सूक्ते[४४] राजधर्मविषयके स्तः। तत्र प्रजावत्सलस्य, प्रजया काम्यमानस्य, शत्रुभ्यः राष्ट्रं

रक्षयितुः राज्ञः कामना क्रियते। राष्ट्रमपि ध्रुवं स्यात्, राजा तस्मान्न भ्रंश्येदित्यपि कामितम्। यथा -

**आ त्वाहार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः। विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत्।।**[४५]

अत्र राज्ञ: कररूपेण बलिप्रदानस्यापि व्यवस्थोल्लिख्यते –

**अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत्।**[४६] एवं यजुर्वेदेऽथर्ववेदे च राज- धर्मसम्बन्धिनो बहवो मन्त्रा सन्ति।

एतत्तु दिग्दर्शनमात्रम्। वेदेषु धर्मशास्त्रसम्बन्धिनी भूयांसि ऋचः लभ्यते। संक्षेपेण कथयितुं शक्यते यद्वेदे सर्वेषां समानरूपेण कल्याणाय धर्मव्यवस्थां कर्तुं बीजरूपेण संकेताः सन्ति। अत एवोक्तम् -

**समानी व आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति॥**[४७]

**निष्कर्षः** -

वैदिकसंहितासु धर्मशास्त्रीयविचाराः महत्त्वपूर्णं स्थानं धारयन्ति। संहितासु धर्मः न केवलं धार्मिकसांस्कारिकयज्ञयोः उल्लेखं करोति, अपितु नैतिकतायाः, सामाजिकव्यवहारस्य, जीवनस्य च विविधाः पक्षाः निर्दिशति। ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदेषु धर्मस्य विविधानि रूपाणि सिद्धान्तानि च व्याख्यातानि, ये पश्चात् धर्मशास्त्रेषु विस्तरेण विकसिताः सन्ति।

वैदिकसंहितासु धर्मस्य एषा बहुविधा दृष्टिः अस्मान् उपदिशति यत् धर्मः केवलं धार्मिकसंस्कारेषु एव सीमितः नास्ति, अपितु जीवनस्य प्रत्येकस्मिन् क्षेत्रे नैतिकतां, कर्तव्यं, सामाजिकन्यायं च स्थापयितुं साधनमस्ति। धर्मानुपालनं न केवलं व्यक्तिगतमोक्षाय आवश्यकं, अपितु समाजस्य कल्याणाय, संतुलनाय च अत्यावश्यकम्।

---

४३ ऋग्वेदः १०.११७.६

४४ ऋग्वेदः ५.६६.६

४५ ऋग्वेदः १०.१७३,१७४

४६ ऋग्वेदः १०.१७३.६

४७ ऋग्वेदः १०.१९१.४